শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

বলিরাজেন্দ্রেণোক্তং

# ॥ শ্রী হরিনামমালাস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী হরিনামমালাস্তোত্রম্ ॥

গোৱিন্দং গোকুলানন্দং গোপালং গোপিৱল্লভম্।
গোৱর্ধনোদ্ধরং ধীরং তং ৱন্দে গোমতীপ্রিযম্॥ **1** ॥

নারাযণং নিরাকারং নরৱীরং নরোত্তমম্।
নৃসিংহং নাগনাথং চ তং ৱন্দে নরকান্তকম্॥ **2** ॥

পীতাম্বরং পদ্মনাভং পদ্মাক্ষং পুরুষোত্তমম্।
পৱিত্রং পরমানন্দং তং ৱন্দে পরমেশ্ৱরম্॥ **3** ॥

রাঘৱং রামচন্দ্রং চ রাৱণারিং রমাপতিম্।
রাজীৱলোচনং রামং তং ৱন্দে রঘুনন্দনম্॥ **4** ॥

ৱামনং ৱিশ্ৱরূপং চ ৱাসুদেৱং চ ৱিঠ্ঠলম্।
ৱিশ্ৱেশ্ৱরং ৱিভুং ৱ্যাসং তং ৱন্দে ৱেদৱল্লভম্॥ **5** ॥

দামোদরং দিৱ্যসিংহং দযালুং দীননাযকম্।
দৈত্যারিং দেৱদেৱেশং তং ৱন্দে দেৱকীসুতম্॥ **6** ॥

মুরারিং মাধৱং মৎস্যং মুকুন্দং মুষ্টিমর্দনম্।
মুঞ্জকেশং মহাবাহুং তং ৱন্দে মধুসূদনম্॥ **7** ॥

কেশৱং কমলাকান্তং কামেশং কৌস্তুভপ্রিযম্।
কৌমোদকীধরং কৃষ্ণং তং ৱন্দে কৌরৱান্তকম্॥ **8** ॥

ভূধরং ভুৱনানন্দং ভূতেশং ভূতনাযকম্।
ভাৱনৈকং ভুজঙ্গেশং তং ৱন্দে ভৱনাশনম্॥ **9** ॥

জনার্দনং জগন্নাথং জগজ্জাড্যৱিনাশকম্।
জামদগ্ন্যং ৱরং জ্যোতিস্তং ৱন্দে জলশাযিনম্॥ **10**॥

চতুর্ভুজং চিদানন্দং চাণূরমল্লমর্দনম্।
চরাচরগতং দেৱং তং ৱন্দে চক্রপাণিনম্॥ **11**॥

শ্রিযঃকরং শ্রিযোনাথং শ্রীধরং শ্রীৱরপ্রদম্।
শ্রীৱৎসলধরং সৌম্যং তং ৱন্দে শ্রীসুরেশ্ৱরম্॥ **12**॥

যোগীশ্ৱরং যজ্ঞপতিং যশোদানন্দদাযকম্।
যমুনাজলকল্লোলং তং ৱন্দে যদুনাযকম্॥ **13**॥

শালগ্রামশিলাশুদ্ধং শঙ্খচক্রোপশোভিতম্।
সুরাসুরৈস্সদা সেৱ্যং তং ৱন্দে সাধুৱল্লভম্॥ **14**॥

ত্রিৱিক্রমং তপোমূর্তিং ত্রিৱিধাঘৌঘনাশনম্।
ত্রিস্থলং তীর্থরাজেন্দ্রং তং ৱন্দে তুলসীপ্রিযম্॥ **15**॥

অনন্তমাদিপুরুষমচ্যুতং চ ৱরপ্রদম্।
আনন্দং চ সদানন্দং তং ৱন্দে চাঘনাশনম্॥ **16**॥

লীলযা ধৃতভূভারং লোকসত্ত্বৈকৱন্দিতম্।
লোকেশ্ৱরং চ শ্রীকান্তং তং ৱন্দে লক্ষ্মণপ্রিযম্॥ **17**॥

হরিং চ হরিণাক্ষং চ হরিনাথং হরিপ্রিযম্।
হলাযুধসহাযং চ তং ৱন্দে হনুমৎপতিম্॥ **18**॥

হরিনামকৃতামালা পৱিত্রা পাপনাশিনী।
বলিরাজেন্দ্রেণ চোক্তা কণ্ঠে ধার্যা প্রযত্নতঃ॥ **19**॥

॥ শ্রী হরিনামমালাস্তোত্রং সমাপ্তম্॥